त्सत्त्वेन गृहाभावः शक्योऽपह्नोतुं येनासिद्धोगृहाभावो बहिर्भावे न हेतुः स्यात् । न च गृहाभावेन वा सत्त्वमपह्नूयते येन सत्त्वमेवानुपपद्यमानमात्मनः सत्तां बहिरवस्थापयेत् तथाहि चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं वा विरुध्यते, गृहसत्त्वं वा ? न तावद्यत्र क्वचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन, भिन्नविषयत्वात् । देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयकतया विरोध इति चेन्न प्रमाणनिश्चितस्य गृहेऽसत्त्वस्य पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षेपातोगात् । नापि प्रमाणनिश्चितोगृहाभावः पाक्षिकमस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमात्रमपि प्रतिक्षेप्तुं, सांशयिकत्वं वापनेतुमर्हतीति युक्तं गृहावच्छिन्नेन चैत्राभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिक्षिप्यते न तु सत्त्वमात्रं तस्य तत्रौदासीन्यात् । तस्मात् गृहाभावेन लिङ्गेन सतो बहिर्भावोऽनुमीयत इति युक्तम् । एतेन विरुद्धयोः प्रमाणयोर्विषयव्यवस्थया अविरोधापादनमर्थापत्तेर्विषयइति परास्तम् अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात् । उदाहरणान्तराणि चार्थापत्तेरेवमेवानुमानेऽन्तर्भावनीयानीति” सां कौ० । व्याख्यातञ्चैतदस्माभिस्तट्टीकायां यथा “व्यापकस्य देशविशेषेऽस्थितावपि देशान्तरे सत्त्वमवगम्यते इत्याह व्यापकः सन्नित्यादि । सन् सत्त्वाश्रयः । व्यापकः सत्त्वव्यापकः, तथा च । सन् चैत्रो बहिरस्ति गृहेऽस्थितत्वात्स्वशरीरवदित्यनुमानादेवार्थापत्ति-विषय–सिद्धिरिति भावः । सत्त्वाश्रयस्य सतः पक्षीकरणात् सत्त्वासत्त्वयोश्च विरोधितया सत्त्वप्रतिरुद्धः कथं गृहेऽसत्त्वरूपो हेतुस्तिष्ठेत् तथाच स्वरूपासिद्धहेतुना कथं बहिःसत्त्वरूपसाध्यसिद्धिरिति आशङ्क्य समाधत्ते न च चैत्रस्येत्यादिना । गृहाभावः गृहासत्त्वम् बहिर्भावः बहिःसत्त्वम् । ननु गृहेऽसत्त्ववतः कथं सत्त्वाश्रयता सत्त्वासत्त्वयोर्विरोधित्वात्तथा चाश्रयासिद्धिरित्याशङ्क्य समाधत्ते न च गृहाभावेनेति गृहासत्त्वेनेत्यर्थः । गृहासत्त्वस्य गृहसत्त्वं प्रत्येव विरोधिता न तु सत्त्वसामान्यं प्रतीति समर्थयितुं विकल्पयति तथाहि चैत्रस्येति । ननु सत्त्वमाश्रयसामान्यमाक्षिपत् देशसामान्यमेवाक्षिपति देशसामान्यमाक्षिपता च तेन तन्मध्यवर्त्तिनोगृहरूपदेशस्यापि समाक्षेपात् गृहस्यापि पाक्षिकसत्त्वलाभेन तेन सह गृहासत्त्वस्य विरोधित्वात् पुनः स्वरूपासिद्धिरित्याशङ्कते देशसामान्येनेति आक्षिप्यमाणेनेत्यादिस्तथाच सामान्यदेशाक्षेपेणैव विशेषदेशाक्षेपइति भावः । परिहरति नेति । पाक्षिकतया पक्षे प्राप्ततया । सांशयिकेन संशयमापन्नेन । “सामान्यविषयं सत्तावाक्यं “गृहविषयं न वेति” संशयमात्रलब्धेन गृहसत्त्वेन प्रतिक्षेपायोगात् तस्य दुर्बलतया प्रतिबन्धकत्वानौचित्यात् । प्रमाणनिश्चितस्य प्रात्यक्षिकस्य गृहासत्त्वस्य गृहसत्त्वं प्रत्येव प्रतिबन्धकत्वं न तु सत्त्वसामान्यं प्रतीति व्यवस्थापयन्नाह नापि प्रमाणेति । अस्य चैत्रस्य । प्रतिक्षिपन् प्रतिरुन्धन् । प्रतिक्षेप्तुं प्रतिरोद्धुमर्हतीत्यग्रेणान्वयः । सांशयिकत्वं संशयमापन्नत्वम् । एतस्य च सत्त्वमात्रस्येत्यादिः । अपनेतुमपवारयितुम् । विषयविशेषे एव विरोधित्वमित्युपसंहरति युक्तमित्यादिना एतावता प्रबन्धेन व्यवस्थापितमर्थं निगमयन्नाह तस्मादिति । गृहासत्त्वप्रमाणं प्रत्यक्षं, सत्त्वसामान्यप्रमाणमनुमानमेतयोर्विषयविशेषे व्यवस्थापनेनाविरोधापादनम् समावेशनमित्येवार्थापत्तेः फलं तत् निरस्यति एतेनेति । वक्ष्यमाणहेतुनेत्यर्थः परास्तमित्यग्रेणास्यान्वयः । विरोधाभावे हेतुं वदन् निरसनहेतुं द्योतयति अवच्छिन्नेत्यादि गृहावच्छिन्नसत्त्वं प्रत्यक्षविषयः, गृहानवच्छिन्नसत्त्वमनुमानविषय इत्येकविषयत्वाभावेन–विरोधाभावात् विरोधस्यैव तत्रासद्भावात् अर्थापत्त्या किं समाधास्यते इति भावः”। २अर्थालङ्कारभेदे ‘दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते” सा० द० । ‘मूषिकेण दण्डो भक्षित’ इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवति इत्येष न्यायो दण्डापूपिका । अत्र च क्वचित् प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात् प्राकरणिकार्थस्येति द्वौ भेदौ । क्रमेणोदाहरणे । “हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले। मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः’ । विललाप सवाष्पगद्गदं सहजामप्यवहाय धीरताम् । अभितप्तमयोऽपि मार्द्दवं भजते कैव कथा शरीरिणाम्” ॥ “यदकीर्त्तितमर्थादापद्यते सार्थापत्तिः” इति सुश्रुतोक्ते ४तन्त्रयुक्तिभेदे च ।

**अर्थिक** पु० अर्थयते इत्यर्थी याचकः कुत्सितार्थी कन् । निद्रागतनृपादेर्जागरणार्थं नियुक्ते स्तुतिपाठकादौ ।

**अर्थित** त्रि० अर्थ–गौणे कर्म्मणि क्त । १याचिते यस्य सकाशात् याच्यते स तस्मिन् । “अवकाशं किलोदन्वान् रामायाभ्यर्थितोददौ” रघुः । तस्याविवक्षायां मुख्ये कर्म्मणि क्त । याचनाकर्म्मणि २पदार्थे यद्वस्तु कस्यचित् समीपे याच्यते तस्मिन् । अर्थिनो याचकस्य भावः तल् । ३याच्ञायां स्त्री ।